# श्री सोमनाथसंस्कृत-युनिवर्सिटी, वेरावलम्
# सत्रान्तपरीक्षा, अक्तुबर - 2019

| | | |
|---|---|---|
| **कक्षा – शास्त्री-3** | **सत्रम् – 5** | **गुणाः - 70** |
| **विषयः – धर्मशास्त्रम्** | **प्रश्नपत्रम् - 8 - CE - 3.5.10 - OLD** | **समयः - 3 तः 6** |
| **दिनाङ्कः- 17/10/2019** | **सन्दर्भग्रन्थः – मनुस्मृतिः – ९-१० अध्यायौ** | |

**( प्रथमान्वितिः - युनिट-1 )**

**प्र-1 द्वयोः ससन्दर्भं व्याख्या कार्या।** **10**

1. यादृशं भजते हि स्त्री सुतं सुते तथाविधम्।
   तस्मात् प्रजाविशुद्ध्यर्थं स्त्रियं रक्षेत् प्रयत्नतः ।।
2. भर्तुः शरीरशुश्रूषां धर्मकार्यं च नैत्यकम्।
   स्वा चैव कुर्यात् सर्वेषां नाऽस्वजातिः कथञ्चन ।।
3. ददौ स दश धर्माय कश्यपाय त्रयोदश।
   सोमाय राज्ञे स्वत्कृत्य प्रीताऽत्मा सप्तविंशतिम् ।।

**प्र-2 कस्याप्येकस्य निबन्धात्मकमुत्तरं लिखत।** **10**

1. ग्रन्थोक्तदिशा स्त्रीरक्षणोपायम् उल्लिख्य स्त्रीस्वभावं लिखत।
2. जन्मतो ज्यैष्ठ्यम् - इत्युल्लिख्य पुत्रिकायाः धनग्राहित्वं ग्रन्थानुगुणं वर्णयत।

**प्र-3 द्वयोः ससन्दर्भं व्याख्या कार्या।** **10**

1. सदृशं तु प्रकुर्याद् यं गुणदोषविचक्षणम्।
   पुत्रं पुत्रगुणैर्युक्तं स विज्ञेयश्च कृत्रिमः ।।
2. अमात्याः प्राड्वाको वायत् कुर्युः कार्यमन्यथा।
   तत्स्वयं नृपतिः कुर्यात् तान् सहस्रं च दण्डयेत् ।।
3. धर्मेण च द्रव्यवृद्धावातिष्ठेद् यत्नमुत्तमम्।
   दद्याच्च सर्वभूतानामन्नमेव प्रयत्नतः ।।

**प्र-4 कस्याप्येकस्य निबन्धात्मकमुत्तरं लिखत।** **10**

1. सपिण्डाद्यभावे धने केषाम् अधिकारः ग्रन्थोक्तदिशा वर्णयत।
2. ग्रन्थानुगुणं वैश्यस्य धर्मं सविस्तरं लिखत।

**( द्वितीयान्वितिः - युनिट-2 )**

**प्र-5 द्वयोः ससन्दर्भं व्याख्या कार्या।** **10**

1. सर्ववर्णेषु तुल्यासु पत्नीष्वक्षतयोनिषु।
   आनुलोम्येन सम्भूता जात्या ज्ञेयास्त एव ते ।।
2. दिवा चरेयुः कार्यार्थं चिह्निनता राजशासनैः।

अबान्धत्वं शवं चैव निर्हरेयुरिति स्थितिः ।।

3. विद्या शिल्पं भृतिः सेवा गोरक्ष्यं विपणिः कृषिः ।
   धृतिर्भैक्ष्यं कुसीदं च दशजीनवहेतवः ।।

**प्र-6 कस्याप्येकस्य निबन्धात्मकमुत्तरं लिखत ।** **10**

1. मनुस्मृत्यनुसारेण द्विजानां विशिष्टकर्माणि वर्णयत ।
2. प्रतिग्रहनिन्दां विलिख्य प्रतिग्रहादिपापनाशने उपायान् लिखत ।

**प्र-7 दशानां एकवाक्येन उत्तराणि लिखत ।** **10**

1. स्त्रियं कौमारेऽवस्थायां कः रक्षति
2. नारी किं भूता कथ्यते (स्मृता)
3. क्षेत्रबीजसमायोगात् केषाम् उत्तत्तिर्भवति
4. भूतानां शाश्वती योनिः कोच्यते
5. ऋतुमती सती कुमारी कति वर्षाणि उदीक्षेत्
6. पितेव पुत्रान् अनुजान् भ्रातृन् कः पालयति
7. दायादा बान्धवाश्च कति, के च ते
8. पितृरिक्थस्य भगिनौ कौ पुत्रौ
9. स्वभार्यायाम् उत्पन्नः पुत्रः किं कथ्यते
10. मनुस्मृतेः नवमेऽध्याये कति श्लोकाः सन्ति
11. वेदपारगो ब्राह्मणः कस्य ईशः कथ्यते
12. कीदृशो राजा कृतयुग नाम्ना कथ्यते
13. पापाऽत्मा भूर्जकण्टकः कस्मात् जायते
14. अध्यापनमध्ययनादीनि षट्कर्माणि कस्य सन्ति
15. विप्रसेवैव शूद्रस्य किं कीर्त्यते

*********************